# 6. कालिदासः



छात्राः – नमस्ते आचार्यवर्य!

अध्यापकः – प्रिय-छात्राः । मङ्गलानि भवन्तु। उपविशत। पश्यन्तु इदं चित्रं।

सर्वे – पश्यामः गुरुवर्य!

अध्यापकः – चित्रे किं पश्यथ? सुरेश, त्वं कथय।

सुरेशः – एतत् भारतस्य मानचित्रम् अस्ति।

अध्यापकः – समीचीनम्। गिरीश, त्वं वद। चित्रे किमपि अन्यत्

पश्यसि?

गिरीशः – आम् महोदय! एकस्य महापुरुषस्य चित्रं पश्यामि। कोऽयं महापुरुषः? कृपया वदतु।

अध्यापकः – अस्य महापुरुषस्य नाम महाकविः कालिदासः ।

गणेशः – गुरुदेव! किं किं लिखितम् अनेन महापुरुषेण?

अध्यापक – समीचीनः प्रश्नः । अधः प्रदत्तं चित्रं पश्य। अत्र किं किम् अस्ति?

गणेशः – गुरुदेव! अत्र अनेकानि पुस्तकानि सन्ति।

अध्यापकः – नामानि पठित्वा कथय।

गणेशः – कुमारसम्भवम्, रघुवंशम्, मेघदूतम्, ऋतुसंहारम्, अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्।

अध्यापकः – अतिशोभनम्।

दिनेशः – आचार्य! अयं कविः कुत्र अवसत्?

अध्यापकः – वत्स दिनेश! मानचित्रं पश्य। तत्रैव लिखितम् अस्ति।

दिनेशः – पश्यामि गुरो! 'उज्जयिनी' इति लिखितम्।

अध्यापकः – शोभनम्। उज्जयिनी एव एतस्य महाकवेः जन्मस्थानम्। तत्रैव अवसत् सः। भुवनेश! त्वं वद, उज्जयिनी कस्मिन् प्रदेशे अस्ति?

भुवनेशः – आचार्य! मध्यप्रदेशे अस्ति इति।

अध्यापकः – समीचीनम्।

प्रिय–छात्राः! ध्यानेन शृणुत। एतेषु पुस्तकेषु भारतीय–संस्कृतिः वर्णिता। अयं कविः कालिदासः राजा भोजस्य सभायाम् आसीत्। राजा भोज : कालिदासस्य परमं मित्रम् आसीत्। अयं संस्कृतसाहित्यस्य भारतदेशस्य च रत्नम् अस्ति।

# अनुशीलनम्

1. **आम् अथवा न इति लिखत।**

*उत्तराणि*

(i) किम् अस्मिन् पाठे भारतस्य मानचित्रं प्रदर्शितम्? ...............

(ii) किं मानचित्रे अन्यस्य कस्यापि चित्रम् अस्ति? ...............

(iii) किम् इदं चित्रं महाकवेः कालिदासस्य अस्ति? ...............

(iv) किम् अभिज्ञानशाकुन्तलम् इति नाटकस्य लेखकः महाकविः कालिदासः? ...............

(v) किं रघुवंशमहाकाव्यम् अपि महाकविना कालिदासेन लिखितम्? ...............

2. **अधोलिखित-प्रश्नानाम् उत्तराणि एकेन-पदेन लिखत।**

(i) अस्माकं देशस्य महाकविः कः? ...............

(ii) कालिदासः कुत्र अवसत्? ...............

(iii) महाकविः कालिदासः कुत्र अवसत्? ...............

(iv) ''मेघदूतम्'' नाम गीतिकाव्यं केन लिखितम्? .......

.........

**3. रेखाङ्कित-पदम् आधृत्य प्रश्ननिर्माणं कुरुत।**

(i) <u>भारतस्य</u> मानचित्रम्।

(ii) अयं <u>महाकविः</u> अस्ति।

(iii) चित्रे <u>सप्त</u> पुस्तकानि सन्ति।

(iv) कालिदासः <u>उज्जयिन्याम्</u> अवसत्।

(v) <u>कालिदासः</u> साहित्यमालायाः रत्नम् अस्ति।

**4. एकेन वाक्येन उत्तराणि देयानि।**

(i) कालिदासः कस्य सभायाम् आसीत्?

(ii) कालिदासस्य मित्रं कः आसीत्?

(iii) अस्य रचनासु कस्य संस्कृतिः वर्णिता अस्ति?

(iv) कालिदासस्य जन्मस्थानं किम्?

**5. मञ्जूषायाः चित्वा द्वे पर्यायवाची पदे लिखत –**

सेवकः, शिक्षकः, भूपतिः, भृत्यः, अध्यापकः, नृपः

उत्तराणि –

1.

2.

**6. कोष्ठकगतं शुद्धं पदम् इति अनेन चिह्नेन चिह्नयत।**

1. कालिदासेन समानः न कोऽपि .................... (आसीत्/आसन्)

2. कालिदासः .......................... आसीत्। (महाकविः/ सामान्यकविः)

3. कालिदासः भोजस्य .................... आसीत्। (मित्रं/शत्रुः)

4. अयं कविः ............................ अवसत्। (उज्जयिनीनगरे/ दिल्लीनगरे)

## 7. कालिदासेन लिखितानां पुस्तकानां नामानि लिखत।

1. .................... 2. ....................

3. .................... 4. ....................

5. .................... 6. ....................

7. ....................